# Language – Part I – SANSKRIT

Time Allowed : 3.00 Hours ] [ Maximum Marks : 90

**Instructions :** (1) Check the question paper for fairness of printing. If there is any lack of fairness, inform the Hall Supervisor immediately.

(2) Use **Blue** or **Black** ink to write and underline and pencil to draw diagrams.

**Note :** (i) Answers should be in English, Sanskrit or Tamil except for those which are to be answered in Sanskrit.

(ii) In writing Sanskrit, Devanāgari script should be used.

## PART - I

अधोलिखितानां प्रश्नानां समीचीनं उत्तरं लिखत : **14x1=14**

Choose the **correct** answer :

**1.** कः कोपशत्रुं उद्धरति ?

(a) आत्म रक्षकः (b) देह रक्षकः (c) धन रक्षकः

**2.** सीतया कुतूहलेन कं स्पृष्टवति ?

(a) आकाशम् (b) मेघम् (c) विमानम्

**3.** कृष्णः कं जघान ?

(a) वंशम् (b) कंसं (c) अंसं

**4.** __________ त्रिगणः इति उच्चते।

(a) धर्मार्थकामः (b) कामक्रोधलोभः (c) जन्ममृत्युजराः

**5.** अतृणे पतितः कः उपशाम्यति ?

(a) वर्षः (b) वहिनः (c) अनिलः

**6.** अष्टाङ्गहृदयं इति ग्रन्थस्य कर्ता __________

(a) धन्वन्तरिः (b) चरकः (c) वाग्भटः

[ Turn over

7. श्रीकृष्णः शत्रुभिः कथमिव दृष्टः ?
(a) कामः (b) देवः (c) कालः

8. कृपणः कति तण्डुलं दरिद्राय अयच्छत् ?
(a) पञ्चमुष्टि (b) एकमुष्टि (c) बहुमुष्टि

9. ________ उपनिषदि गुणत्रयकथा प्रतिपादिता।
(a) छान्दोग्य (b) कठ (c) बृहदारण्यक

10. भारतीयाः वयं कस्याः वसून् भुञ्जामः ?
(a) देवानाम् (b) पित्रोः (c) पृथिव्याः

11. कः नरेन्द्रस्य अध्यात्मगुरुः ?
(a) श्रीरामदासः (b) श्रीरामनाथः (c) श्रीरामकृष्णः

12. भारतस्य संस्कृतिः ________ भवति ?
(a) अतिन्यूनता (b) अति प्राचीना (c) अति नूतना

13. मालविकाग्निमित्रे अङ्काः सन्ति ________
(a) पञ्च (b) सप्त (c) नव

14. किमर्थं राजा वनम् अगच्छत् ?
(a) जलार्थम् (b) धनार्थम् (c) मृगयार्थम्

## PART - II
## SECTION - 1

त्रयाणां प्रश्नानां उत्तरं लिखत :

Answer **any three** of the following :

15. नरः कुत्र मृत्युम् इच्छति ?
Where does a person want death ?

16. कः दुर्लभम् वचः ?
What is the rare speech ?

17. मरीचः किं हन्ति ?
What does the black pepper mitigate ?

18. कीदृशी वाचं वदेत् ?
What kind of words should be spoken ?

## SECTION - 2

द्वयोः प्रश्नयोः उत्तरं लिखत :

Answer any two of the following : 2x2=4

19. विज्ञाने कति शाखाः वर्तन्ते ?

How many branches are there in Science ?

20. पाण्डवाः किमर्थं वनान्तरं अगच्छन् ?

Why did Pandavas go to another forest ?

21. साधुः किं कर्तुं कृपणं आदिशत् ?

What did Saint order to miser ?

## SECTION - 3

व्याकरण विशेषः (Grammar) 7x2=14

Answer **any seven** of the following :

22. अधो दत्तानां शब्दानां अर्थं लिखत : [Meanings]
    - (a) प्रसूः – [expert, parent, son]
    - (b) कुरङ्गः – [deer, monkey, lion]

23. व्याकरणांशं लिखत (Identify the grammatical forms)
    - (a) सताम् –
      - सत् शब्दस्य षष्ठी एकवचनम्
      - सत् शब्दस्य षष्ठी बहुवचनम्
      - सत् शब्दस्य द्वितीया द्विवचनम्
    - (b) श्रुत्वा –
      - त्वान्तं अव्ययं of श्रु to hear
      - तुमुन्नन्तं अव्ययं of श्रु to hear
      - ल्यबन्तं अव्ययं of श्रु to hear

24. सन्धिं कुरुत (Combine)
    - (a) प्राक् + एव – [प्रागिव, प्रागैव, प्रागेव]
    - (b) पापम् + उत्कटम् – [पापमुत्कटं, पापमुत्कटं, पापमित्कटम्]

25. सन्धि विच्छेदं कुरुत (Split the following words)
    - (a) विद्येव – [विद्या + इव, विद्या + एव, विद्या + ईव]
    - (b) हितान्न – [हितान् + न, हितम् + नु, हितात् + न]

26. विपरीतपदानि लिखत (Write the opposite words)
   (a) पण्डिताः × ______ [मूर्खाः, विद्वान्, कन्या]
   (b) दूरे × ______ [विलम्बः, अन्तिके, अनन्तिके]

27. समानार्थक पदं लिखत (Synonyms)
   (a) पादपः - [लता, तरुः, माला]
   (b) वह्निः - [अग्निः, वायुः, पृथिवी]

28. रिक्तस्थानानि पूरयत (Fill in the blanks)
   (a) अन्नम् __________ न करणीयम्। [शुद्धं, अशुद्धं, पालनं]
   (b) अभिनयाचार्यो __________ द्रष्टुमिच्छतः। [युवां, त्वां, त्वया]

29. समासः (Compound)
   (a) कटुकेन सह वर्तते इति - [अकटुकम्, सकटुकम्, मधुरम्]
   (b) सूर्यस्य पुत्रः - [ सूर्यपुत्रः, सूर्यपुत्राः, सूर्यपुत्रौ ]

30. योजयत (Match the following)

| | | | |
|---|---|---|---|
| (a) | सज्जनसंसर्गः | – | वैमानिकशास्त्रम् |
| (b) | पर्वतकः | – | बृहत्संहिता |
| (c) | वराहमिहिरः | – | सर्वकार्यफलप्रदः |
| (d) | भरद्वाजः | – | आश्रमवासी शुकः |

## PART - III
## SECTION - 1

2x4=8

द्वयोः प्रश्नयोः संक्षेपेण उत्तरं लिखत :

Answer **any two** of the following briefly :

31. युतकस्य किं किं नास्ति ?
   What are not available for a shirt ?

32. उल्लेखालङ्कारस्य उदाहरणं किम् ?
   What is the example for Ullekha Alankara ?

33. भगवद्भक्तिं अधिकृत्य लिखत।
   Write about the devotion to God.

34. धर्मस्य लक्षणानि कानि ?
   What are the characteristics of Dharma ?

## SECTION - 2

द्वयोः प्रश्नयोः संक्षेपेण उत्तरं लिखत : 2x4=8

Answer any two of the following briefly :

35. विवेकानन्दस्य सन्देशः किम्?

What is the message of Vivekananda?

36. प्रजापतिना देवान् प्रति उपदिष्टस्य 'द' इत्यस्य गूढार्थः कः?

What is the hidden meaning of 'द' preached by prajapathi to devas?

37. गिरिकायाः कथनं श्रुत्वा राजा किमकरोत्?

What did the king do after hearing the words of Girika?

38. कृपणस्य जीवनलक्ष्यं किम्?

What was the aim of miser's life?

## SECTION - 3

शब्दरूपं लिखत : 3x4=12

Decline the following :

39. रमा OR सुमनस् OR किम् – स्त्रीलिङ्गे (feminine gender)

धातुरूपाणि लिखत – Conjugate any two of the following as directed :

40. मुद् – लोट् imperative mood

41. कृ – कर – लोट् imperative mood

42. अस् – विधिलिङ् potential mood

43. पठ् – विधिलिङ् potential mood

## PART - IV

सविस्तरं उत्तरं लिखत : **3x6=18**

Answer the following in detail :

**44.** (a) रामः सीतायै दर्शितं प्रकृतिसौन्दर्यं श्लोकत्रयेण लिखत।

Explain the beauty of nature shown by Rama to Sita through three slokas.

**OR**

(b) अलङ्कार त्रयं यथाग्रन्थं व्याख्यात।

Explain three alankaras as per lesson.

**45.** (a) पञ्चभूतानां वृक्षाणां च रक्षणं पूर्वजैः कथं कृतं इति विवृणुत।

How did ancesters protect five elements and trees ? Explain.

**OR**

(b) गुणत्रय कथां यथाग्रन्थं लिखत।

Write in your words the story of "Three qualities" as per the lesson.

**46.** (a) श्लोकानां अनुवादं कुरुत।

Translate the slokas.

(i) समीक्ष्य सम्यगात्मानं अनिन्दन्नब्रुवन् द्रवम्।
इष्टमिष्टैः सहाश्रीयाच्छुचि भक्तजनाहृतम्॥

(ii) आपदां कथितः पन्था इन्द्रियाणां असम्भवः।
तज्जयः संपदां मार्गः येनेष्टं तेन गम्यताम्॥

**OR**

(b) Translate the passage into English :

पूर्वं कश्चन वणिक् वसति स्म। कदाचित् कश्चित् धनिकः तं उक्तवान् – 'भवान् तु महाबुद्धिमान्, किन्तु भवतः पुत्रः तु नितरां मूढः' तं बोधयतु इति। वणिक् तं किमभवत् इति अपृच्छत्। तदा धनिकः सुवर्णरजतयोः कस्य मूल्यम् अधिकं इत्यपि सः न जानाति इति उक्तवान्। नितरां खिन्नः वणिक् गृहं गत्वा पुत्रं सुवर्णरजतयोः कस्य मूल्यम् अधिकं इति पृष्टवान्। पुत्रः प्रत्यवदत्–सुवर्णस्य इति। तत् श्रुत्वा 'धनिकस्य पुरतः किमर्थं मूढमिव आचरितवान्' इति अपृच्छत्। तदा पुत्रः आह–मम विद्यालयगमने माम् आहूय सः धनिकः स्वर्णनाणकं रजतनाणकं च प्रदर्श्य इतः अधिकमूल्यवत् नाणकं स्वीकुरु इति अवोचत्। अहं रजतनाणकं स्वीकरोतिस्म। तदा उच्चैः हसति स्म। एवं प्रतिदिनं एकं रजतं नाणकं प्राप्नोति स्म। यस्मिन् दिने अहं सुवर्णनाणकं स्वीकुर्यां तस्मिन् दिने एषा क्रीडा समाप्ता भवेत्। इदानीं तु तेषां मुखात् मूर्खः इति वचनं श्रुण्वन् अहं एतावत् धनं प्राप्तवान्। अल्पे एव वयसि पुत्रस्य चातुर्यं दृष्ट्वा पिता सन्तुष्टः अभवत्।

## PART - V

47. अनुच्छेदं पठित्वा प्रश्नानां उत्तरं लिखत। 6×1=6

Read the passage and answer the questions below.

कस्मिंश्चित् तपोवने महातपा नाम मुनिः आसीत्। सः एकदा आश्रमसन्निधाने काकमुखात् भ्रष्टः मूषिकशावकं अपश्यत्। सः दयया नीवारकणैः संवर्धितः। तं मूषिकं खादितुं एकः बिडालः प्रयत्नं अकरोत्। ततो भीतः मूषिकः मुनेः प्रभावात् बिडालत्वेन परिवर्तितः। सः बिडालः कुक्कुरात् बिभेति स्म। ततः असौ कुक्कुरः कृतः। सोऽपि व्याघ्रात् अबिभ्यत्। ततः असौ व्याघ्रः कृतः। तत्रत्याः मुनिगणाः 'अनेन मुनिना मूषिकः अयं व्याघ्रतां नीतः इति अवदन्। एतत् श्रुत्वा व्याघ्रः यावदयं मुनिः जीविष्यति तावत् मम स्वरूपस्य कीर्तनं न भवेत् इति समालोचय तं मुनिं हन्तुं ऐच्छत्। तस्य मनोवृत्तिं ज्ञात्वा सः मुनिः तं पुनः ''मूषिको भव'' इति अशपत्।

नीतिः - नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुं इच्छति।।

**प्रश्नाः**

(a) मुनिः आश्रमसन्निधाने किं अपश्यत्?

(b) मूषिकं खादितुं कः प्रयत्नं अकरोत्?

(c) आश्रमस्थ - मुनिगणाः किं अवदन्?

(d) व्याघ्रः किं कर्तुं ऐच्छत्?

(e) मुनिः व्याघ्रं कि अशपत्?

(f) अस्य गद्यांशस्य नीतिः का?

-o0o-